"श्यावतनुः स्फुटितः स्फुरणो वा
क्षुत्समरामयचौरभयाय ॥")

श्यावदन्, [त्] त्रि, (श्यावा दन्ता यस्य। "विभाषा श्यावारोकाभ्याम्।" ५।४।१४४। इति दत्रादेशः।) कृष्णपीतमिश्रितवर्णदन्तयुक्तः। इति सिद्धान्तकौमुदी ॥

श्यावदन्तः, श्यावदन्तकः, त्रि, (श्यावा दन्ता यस्य। "विभाषा श्यावारोकाभ्याम्।" ५। ४। १४४। इति विभाषया दत्रादेशो न। स्वार्थे कन् च।) स्वाभाविककृष्णवर्णदशनयुक्तः। प्रधानदन्तद्वयमध्यस्थक्षुद्रदन्तविशिष्टः। प्रधानदन्तोपरिदन्तान्तरयुक्तः। यथा विष्णुः। अथ नरकानुभूतदुःखानां तिर्य्यक्त्वमुत्तीर्णानां मानुष्ये लक्षणानि भवन्ति। कुष्ठ्यतिपातकी। ब्रह्महा यक्ष्मी। सुरापः श्यावदन्तकः। सुवर्णहारी कुनखी। गुरुतल्पगो दुश्चर्म्मा इत्यादि। श्यावदन्तकः स्वभावकृष्णदन्तः। प्रधानदन्तद्वयमध्यवर्त्तिक्षुद्रदन्तः। प्रधानदन्तोपरि दन्तान्तरमिति केचित् ॥ कुनखी सङ्कुचितनखः। दुश्चर्म्मा स्वभावतः अनावृतमेढ्रः। अतएव महारोगिणो यावज्जीवमशौचमाह कूर्म्मपुराणम्।

"क्रियाहीनस्य मूर्खस्य महारोगिण एव च।
यथेष्टाचरणस्याहुर्म्मरणान्तमशौचकम् ॥"

क्रियाहीनस्य नित्यनैमित्तिकक्रियाननुष्ठायिनः। मूर्खस्य गायत्रीरहितस्य। सार्थगायत्रीरहितस्येति रुद्रधरः ॥ महारोगिणः पापरोगाष्टकान्यतमरोगवतः। ते च उन्मादस्त्वग्दोषो राजयक्ष्मा श्वासो मधुमेहो भगन्दर उदरोऽश्मरी इत्यष्टौ पापरोगा नारदोक्ताः। यथेष्टाचरणस्य द्यूतवेश्याद्यासक्तस्य। एवञ्च भविष्यपुराणोक्तं यतिचान्द्रायणप्रायश्चित्तं अकृतप्रायश्चित्तानां कुष्ठादीनां दाहे बोद्धव्यम्। अन्येषां प्रायश्चित्तोपदेशो विफलः स्यात्। यथा विष्णुः। कुनखी श्यावदन्तश्च द्वादशरात्रं कृच्छ्रं चरित्वोद्धरेयातां तद्दन्तनखौ इति। अत्र द्वादशरात्रं पराकरूपं तत्र पञ्चधेनवः। न तु प्राजापत्यम्। तद्दाहकर्त्तुर्यतिचान्द्रायणेन विषमशिष्टत्वात्। अत्र बहूनामेकधर्म्माणामिति वचनात् आकाङ्क्षितत्वात् कुष्ठादीनामपि प्रायश्चित्तम्। अतएव प्रायश्चित्तविवेकेऽप्युक्तं एवं दुश्चर्म्मादिष्वप्यूह्यमिति। महापातकादतिपातकस्य गुरुत्वात् तच्छेषेऽपि प्रायश्चित्तं द्विगुणम्। इति शुद्धितत्त्वम् ॥

श्येतः, पुं, (श्येङ गतौ + "हृश्याभ्यामितन्।" उणा० ३। ९३। इति इतन्।) शुक्लवर्णः। तद्वति, त्रि। इत्यमरः ॥

श्येतकोलकः, पुं, (श्येतः कोलः क्रोडदेशो यस्य। कन्।) मत्स्यविशेषः। पुँटी इति भाषा। यथा। सफरः श्येतकोलकः। इति हारावली ॥

श्येनः, पुं, (श्यै ङ गतौ + श्यास्त्याहृञविभ्य इनच्।" उणा० २। ४६। इति इनच्।) पाण्डुरवर्णः। इति मेदिनी ॥ पक्षिविशेषः। सञ्चाल इति बाज् इति च भाषा। तत्पर्य्यायः। शशादनः २ पत्री ३। इत्यमरः ॥ कपोतारिः ४ पतङ्गोरः ५। इति शब्दरत्नावली। घातिपक्षी ६ ग्राहकः ७ मारकः ८। इति जटाधरः ॥ शशादः ९ क्रव्यादः १० क्रूरः ११ वेगी १२ खगान्तकः १३ करगः १४ नीलपिच्छः १५ लम्बकर्णः १६ रणप्रियः १७ रणपक्षी १८ पिच्छवाणः १९ स्थूलनीलः २० भयङ्करः २१। इति राजनिर्घण्टः ॥ शशघातकः २२। इति भावप्रकाशः ॥ अस्य मांसगुणाः प्रसहशब्दे द्रष्टव्याः ॥*॥ तस्य शुभाशुभसूचकत्वं यथा,—

"प्रदक्षिणीकृत्य नरं व्रजन्तो
यात्रासु वामेन गताः प्रवेशे।
श्येनाः प्रशस्ताः प्रकृतस्वरास्ते
शान्ताः प्रदीप्ता विततस्वरास्ते ॥
श्येनो नृणां दक्षिणवामपृष्ठ-
भागेषु भाग्यैः स्थितिमादधाति।
तिष्ठन् पुरस्तान्मृतये करोति
युद्धे जयं छत्ररथध्वजस्थः ॥"

इति वसन्तराजशाकुने अष्टमवर्गः ॥

श्येनघण्टा, स्त्री, दन्तीवृक्षः। इति राजनिर्घण्टः ॥

श्येनचित्, पुं, (श्येनेन चयति अन्यपक्षिण इति। चि + क्विप्।) श्येनपक्षिरक्षकः। इति केचित् (श्येन इव चीयते इति। कर्म्मण्यग्न्याख्यायाम्।" ३। २। ९२। इति क्विप्। अन्वर्थं इष्टकाचयः। इति काशिका ॥)

श्येनी, स्त्री, श्वेतवर्णा। इति जटाधरः ॥ श्येनपत्नी च ॥ (सा तु कश्यपात् दक्षकन्यायां ताम्रायां समुत्पन्ना। यथा, मार्कण्डेये। १०४।८।

"ताम्रा च सुषुवे श्येनीप्रमुखाः कन्यका द्विज।
यासां प्रसूताः खगमाः श्येनभासशुकादयः ॥")

श्यै, ङ गतौ। इति कविकल्पद्रुमः ॥ (भ्वा०-आत्म०-सक०-अनिट्।) तालव्यादिरन्तस्थाद्योपधः। ङ, श्यायते। इति दुर्गादासः ॥

श्यैनम्पाता, स्त्री, (श्येनपातोऽस्यां वर्त्तते इति। "घञः सास्यां क्रियेति ञः।" ४। २। ५८। इति ञः। "श्येनतिलस्य पाते ञे।" ६।३।७१। इति मुमागमः।) मृगया। इत्यमरः। (यथा, नैषधे। १९। १२।

"नभसि महसां ध्वान्तध्वाङ्क्षप्रमापणपक्षिणामिह विहरणैः श्यैनम्पातां रवेरवधारयन् ॥")

श्यो(शो)नाकः, पुं, (श्यायते इति। श्यै ङ गतौ + पिणाकादयश्चेति निपातनात् साधुः।) वृक्षविशेषः। शोनागाछ इति भाषा। तत्पर्य्यायः। मण्डूकपर्णः २ पत्रोर्णः ३ नटः ४ कट्वङ्गः ५ टुण्टुकः ६ शुकनासः ७ ऋक्षः ८ दीर्घवृन्तः ९ कुटन्नटः १० शोणकः ११ अरलुः १२। इत्यमरः ॥ स्योनाकः १३। इति भरतः ॥ शोणः १४ अवटुः १५ दीर्घवृन्दकः १६। इति शब्दरत्नावली ॥ पृथुशिम्बिः १७ भल्लकः १८। इति जटाधरः ॥ कटम्भरः १९ मयूरजङ्घः २० अरलुकः २१ प्रियजीवः २२। तद्भेदा यथा,—

"श्योनाकः पृथुशिम्बोऽन्यो भल्लूको दीर्घवृन्तकः
टेन्टुकः पीतवृक्षश्च भूतसारो मुनिद्रुमः ॥
निःसारः फलवृन्ताकः पूतिपत्रो वसन्तकः।
मण्डूकवर्णः पीताङ्गो जम्बुकः पीतपादकः ॥
वातारिः पीतकः शोणः कुलटश्च विरोचनः।
भ्रमरेष्टो वह्निजङ्घो नेत्रनेत्रमिताभिधः ॥"

पुस्तकान्तरे टेन्टुकस्थाने टुण्टुकः फलवृन्ताकस्थाने फल्गुवृन्ताकः पीतपादकस्थाने पीतपादपः कुलटस्थाने कुनटः वह्निजङ्घस्थाने वर्हिजङ्घ इति च पाठः ॥ तयोर्गुणाः।

"श्योनाकयुगलं तिक्तं शीतलञ्च त्रिदोषजित्।
पित्तश्लेष्मातिसारघ्नं सन्निपातज्वरापहम् ॥"

इति राजनिर्घण्टः ॥*॥

अपिच।

"श्योनाकः शोषणश्च स्यान्नटकट्वङ्गटुण्टुकाः।
मण्डूकपर्णपत्रोर्णशुकनासकुटन्नटाः ॥
दीर्घवृन्तोऽरलुश्चापि पृथुशिम्बः कटम्भरः।
श्योनाको दीपनः पाके कटुकस्तुवरो हिमः ॥
ग्राही तिक्तोऽनिलश्लेष्मपित्तकासप्रणाशनः।
कटुकस्य फलं बालं रूक्षं वातकफापहम् ॥
हृद्यं कषायं मधुरं रोचनं लघु दीपनम्।
गुल्मार्शःकृमिहृत् प्रोक्तं गुरु वातप्रकोपणम्" ॥

इति भावप्रकाशः ॥

श्रक, इ ङ सर्पे इति कविकल्पद्रुमः ॥ (भ्वा०-आत्म०-सक०-सेट्।) रेफयुक्ताद्यः। इ, श्रङ्क्यते ङ, श्रङ्कते। सर्पो गतिः। इति दुर्गादासः ॥

श्रग, इ व्रजे। इति कविकल्पद्रुमः ॥ (भ्वा०-पर०-सक०-प्लुतौ अक०-सेट्।) रेफान्ततालव्यादिः। अयं प्लुतगताविति भट्टमल्लः। इ, श्रङ्ग्यते। इति दुर्गादासः ॥

श्रण, कन्दाने। इति कविकल्पद्रुमः ॥ (चुरा०-पर०-सक०-सेट्।) क, श्राणयति। स्वमते अस्य ञाङि ह्रस्वविकल्पनेऽप्यष्टमस्वरानुबन्धाभावोऽन्येषामनुरोधात्। इति दुर्गादासः ॥

श्रण, म दाने। इति कविकल्पद्रुमः ॥ (भ्वा० पर० सक०-सेट्। तालव्यादी रेफयुक्तः। म, श्रणयति। इति दुर्गादासः ॥

श्रत्, व्य, श्रद्धा। इति मुग्धबोधटीकायां दुर्गादासः ॥ (सत्यम्। इति निघण्टुः। ३।१० ॥)

श्रथ, इ ङ शैथिल्ये। इति कविकल्पद्रुमः ॥ (भ्वा० आत्म०-अक०-सक०-च सेट्।) शैथिल्यमिह शिथिलीभावस्तत्करणञ्च।। इ, श्रन्थ्यते। ङ, श्रन्थते वस्त्रं शिथिलं स्यादित्यर्थः। श्रन्थते वस्त्रं लोकः शिथिलं करोति इत्यर्थः। इति दुर्गादासः ॥

श्रथ, क यत्ने। प्रतिहर्षे। इति कविकल्पद्रुमः ॥ (चुरा०-पर०-यत्ने अक०-प्रतिहर्षे सक० सेट्। क, श्राथयति पठितुं शिष्यः। श्राथयति शिष्यं लोकः पुनःपुनर्हर्षयति इत्यर्थः। इति दुर्गादासः ॥